# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 8 | गुणाः – ५० |
| विषयः – वेदः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २२/०७/२०२१ | सन्दर्भग्रन्थः – वेदभाष्यभूमिकासङ्ग्रहः | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः ।
अन्यद्ब्राह्मणमित्येतत् भवेद् ब्राह्मणलक्षणम् ॥

२ हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः ।
परकृतिः पुराकल्पो व्यवधारणकल्पना ॥

३ नर्कसामयजुषां लक्ष्म साङ्कर्यादिति शङ्किते ।
पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्यसङ्करः ॥

**प्रश्नः २ अक्षरविकारादीनां सामनिष्पादकत्वं वर्ण्यताम् ।**

**प्रश्नः ३ ऋत्विजां कर्मणि विषये विवेचयत ।**

**प्रश्नः ४ कयोरपि द्वयोः व्याख्या कार्या ।**

१ यजुर्वेदस्थमाधानं तदङ्गं साम तत्र किम् ।
उच्चैरुपांशु वा गानमुच्चैः शीघ्रप्रतीतितः ॥

२ यच्चित्रया यजेतेति तद्गुणो नाम वा भवेत् ।
चित्रस्त्रीत्वगुणौ रूढेरग्नीषोमीयके पशौ ॥

३ त्रय्यां च दण्डनीत्यां च कुशलः स्यात् पुरोहितः ।
अथर्वविहितं कर्म कुर्याच्छान्तिकपौष्टिकम् ॥

**प्रश्नः ५ त्रिवृदादिस्तोमानां स्वरूपनिरूपणं कुरुत ।**

**प्रश्नः ६ ‘मन्त्रैरर्थानुस्मरणत्वनिर्णय’ इति वर्णयत ।**

**प्रश्नः ७ कयोरपि द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ अथर्ववेदस्य पुराणादिषु प्रशंसावचनम् ।

२ स्तोमस्य लक्षणनिर्देशः ।

३ वेदानामपौरुषेय प्रतिपादनम् ।

**प्रश्नः ८ नित्यनैमित्तिककाम्यभेदेन कर्मणां त्रैविध्यं विवेचयत ।**

**प्रश्नः ९ अथर्ववेदस्य शाखाविषयको विचारः प्रस्तूयताम् ।**

**प्रश्नः १० अधोलिखितेषु दशानां लघूत्तराणि लिखत ।**

१ उद्गातृ नामक ऋत्विक् किं गायति ?

२ यज्ञस्य स्वरूपं कः सम्पादयति ?

३ मन्त्रलक्षणस्य सूत्रं प्रतिपादयतु ।

४ ब्राह्मणस्य लक्षणं किम् ?

५ 'गीतिषु........' इत्यत्र अपेक्षितं पूरयत ।

६ सामवेदभाष्यभूमिकायाः कर्ता कः ?

७ अथर्ववेदस्य ऋत्विक् कः ?

८ कर्म कतिविधम् ?

९ 'त्रयोवेदा असृजयन्त' सूत्रार्थं लिखत ।

१० 'उरु प्रथस्वेति पुरोडाशं प्रथयति' इति सूत्रवाक्यं केनोक्तम् ?

११ महाव्रते किं श्रूयते ?

१२ 'स्वाध्यायोऽध्येतव्यः' सूत्रं केन ब्राह्मणेनोक्तम् ?

१३ कस्मिन् वर्षे क्षत्रियम् उपनयीत ?

१४ 'स्फोटः' इति शब्दस्य व्युत्पत्तिं कुरुत ।

१५ अध्येतव्यः इत्यत्र कः प्रत्ययः ?

****